International Journal of Sanskrit Research 2023; 9(2): 252-254

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(2): 252-254
© 2023 IJSR
www.anantaajournal.com
Received: 10-01-2023
Accepted: 14-02-2023

**कृष्णगोपालः बलः**
गवेषकः, राँची विश्वविद्यालयः,
राँची, झारखंड, भारत

**Corresponding Author:**
**कृष्णगोपालः बलः**
गवेषकः, राँची विश्वविद्यालयः,
राँची, झारखंड, भारत

# सामाजिकावक्षयरोधे संस्कृतशास्त्रस्य अवदानम्

**कृष्णगोपालः बलः**

**सारांश**
अस्य प्रवन्धस्य अत्यल्प परिसरे वर्तमानसमाजस्य दिकसमूहानां यथा आधुनिक शिक्षाव्यवस्था तथा छात्र-शिक्षकयोः सम्पर्कः नारीशिक्षा वाल्यविवाह सामाजिकवैषम्य सांसारिक सुखशान्ति प्रतिष्ठायां गृहस्थानां कर्तव्येषु इत्यादिषु गुरुत्वपूर्णा। सामाजिकक्षेत्रेषु यत् अवक्षयस्य सूत्रपातः संघटितः तस्य कवलात् रक्षार्थं संस्कृतसाहित्योक्तं विधिविधानं कियत् भूमिकां पालयितुं शक्नोति ताः विविधा दिशः अत्र आलोच्यन्ते।

**कूटशब्दः** भाषा, समाजस्य, उपदेशः, शास्त्रेषु, वर्तमाने, अवक्षयः, दृश्यते, इति, आसीत्, भवति, एव

## प्रस्तावना

मनुष्यानां स्वातन्त्रे अभिज्ञानं नाम भाषा इति। प्राचीनभारतीयानां भाषा वैदिकभाषा वा या अस्मिन् देशे ब्राह्मण्य संस्कृतेः धारक वाहकभूताः मणिषिभिः देवभाषा इत्युच्यते। तस्याः भाषायाः अपि प्रकृतेः नियमानुसारेण परिवर्तनं साधितम्। ईदृशी विकृतिं रोद्धं वैयाकरणाः व्याकरणनियमजालैः आवद्ध्य भारतीयभाषायाः शुद्ध परिमार्जितरुपस्य यत् आदर्शं विहितवन्तः तदादर्शभूता भाषा संस्कृतम् इति अभिहितम्।

वर्तमाने केचित् जनाः शास्त्रग्रन्थस्य भाषारूपेण संस्कृतं गृह्णन्ति। परन्तु संस्कृतं धर्मीयशास्त्रस्य सूचयति भाषेति। संस्कृतस्य सुदीर्घ इतिहासः सूचयति यत् भारतीयजीवनस्य भारतीयसंस्कृतेश्च इतिहासे संस्कृतभाषायाः अवदानम् असामान्यं खलु। आसमुद्रहिमाचलं यावत् अस्या भाषायाः विस्तृतिः। वैदिकसाहित्यात् अद्यावधिरपि अस्याः भाषायाः यात्रा असमाप्ता इति। फलतः धर्म-दर्शन-समाज-व्यकरण-काव्येतिहास-पुराण-चिकित्सा-प्रयुक्ति-विज्ञानचर्चासु इयं भाषा समृद्धतमा इति ज्ञायते।

अस्य प्रवन्धस्य अत्यल्प परिसरे वर्तमानसमाजस्य दिकसमूहानां यथा आधुनिक शिक्षाव्यवस्था तथा छात्र-शिक्षकयोः सम्पर्कः नारीशिक्षा वाल्यविवाह सामाजिकवैषम्य सांसारिक सुखशान्ति प्रतिष्ठायां गृहस्थानां कर्तव्येषु इत्यादिषु गुरुत्वपूर्णा। सामाजिकक्षेत्रेषु यत् अवक्षयस्य सूत्रपातः संघटितः तस्य कवलात् रक्षार्थं संस्कृतसाहित्योक्तं विधिविधानं कियत् भूमिकां पालयितुं शक्नोति ताः विविधा दिशः अत्र आलोच्यन्ते।

ऋग्वेदगते प्रसिद्धे सूर्यसूक्ते (10.85) तत् कालीनविवाहप्रथायाः यः परिचयः प्राप्यते तत्र दृश्यते नवपरिणीतां वधूं स्वामीगृहे सर्वेषां चित्तान् जेतुं आशीर्वादं क्रियते। यथा –

> सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रां भव।
> ननान्दरि सम्राज्ञी भव सम्राज्ञी अधिदेवृषु॥[1]

पुनः महाकविकालिदासविरचितस्य अभिज्ञानशकुन्तलमिति नाटकस्य चतुर्थाङ्के अपि पतिगृहगमनकाले महर्षि कण्वेन अवश्यपालणीय कर्तव्य विषयान् संस्मारय तपोवनदुहिता शकुन्तला अभिहिता यथा –

> शुश्रूषस्व गुरुन् कुरु प्रियसखीवृत्तिं सपत्नी जने
> भर्तुर्विप्रकृतापि रोषणतया मास्म प्रतिपं गमः।
> भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
> यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥[2]

अयं उपदेशः सर्वदेशे सर्वकालेऽपि नवोढायां प्रयोज्य एव। वर्तमाने काले च सांसारिक सुख.शान्ति प्राप्तये एतादृशस्य उपदेशस्य मूलं न किञ्चिदपि लघु भवति।

वर्तमानसमाजे यत्र तत्रैव अनाथाः शिशवः परिभ्राम्यमानः दृश्यन्ते । अन्नाभावात् स्थायीवासस्थानाभावात् च सर्वत एव निरापत्ताभावात् यथायोग्य लालनपालनाभावात् च ते शिशवः यथा कथञ्चित् वर्धमानाः परवर्तिनीकाले समाजे आतङ्कप्रदा भवन्ति । समाजे अवहेलावशात् अत्याचारकारणात् च तेषां अनेके तस्कराः दस्यवः सन्त्रासवादिनश्च भवन्ति। तत्र तु सन्तानहीनाः धनिदम्पतयः अजस्र मुद्राव्ययेन इतरप्राणीसमुहान् सानन्दं पालयन्ति परिपोषयन्ति च। एवंविधं सङ्कटं समाधातुं यदि तादृशा परिवाराः एकैकं अनाथमानवशिशुं गृहित्वा परिपालयोयुः तदा मनुष्य समाज भविष्यमानात् सङ्कटात् मुक्त जायेत। मानवसम्पदश्च परिपूर्ण विकासेन प्राप्नुयुः। अत्रैव समाजस्य मङ्गलं निहितमस्ति । तत्र प्राचीनाश्रमेव निदर्शनभूताः यथा पितृमातृवर्जिता शकुन्तला तातस्य कण्वमूलेः स्वस्नेहं आश्रयं संप्राप्य पूर्णविकशिता जाता तथैव आधुनिके समाजे अपि शक्त्याः मनुष्याः एतादृशे कर्मणि आत्मनियोगं कुर्युः। तेन अनाथशिशवः समाजस्य सम्पदरूपा एव भवेयुः इत्यत्र न संशयावसरः।

अस्याम् एकविंशशताब्द्यां तिष्ठन्तः वयं पश्यामः इदानीं नारीशिक्षा वाल्यविवाहश्च समाजस्य व्यधिरूपेण प्रकटितौ जातौ । वैदिकयुगमुपेक्ष अधुना वयं पाश्चात्य शिक्षया शिक्षिताः सन्तोऽपि अस्मात् व्यधिकवलात् न विमुक्ता इति । अपि च आधुनिकयान्त्रिकसभ्यता तस्मात् व्यधिसमूहात् अस्मान् विमुच्य अपरैकव्यधिं अस्मभ्यं उपहरति। तत् च नारीपुरुषयोः सामानुपातिकं वैषम्यमेव। अस्य कारणं तु धनी दम्पतिः आधुनिकप्रयुक्तिसहायेन प्रागेव भ्रूणस्य लिङ्गनिर्धार्य कन्याभ्रूणं पातयति । यद्यपि एतस्मिन् विषये भ्रूणनिर्धारण निषेधोऽस्ति तथापि तत्र व्यतिक्रम दृश्यते ।

पुनश्च यदि निर्धने परिवारे कन्यासन्तानो जायेत तदा कन्यासन्तानस्य अवस्था आधुनिक संस्कृतवत् मृतकल्पा भवति । जन्मक्षनादेव कन्या सन्तानः अवहेलाया लाञ्छनायाश्च विषयो भूत्वा कथञ्चित् वर्धते। तेन कन्या सन्तानेन न लभ्यते उपयुक्त शिक्षा मर्यादा वा । वाल्ये एव तस्याः कन्यायाः पितरौ कस्यश्चित् पात्रस्य हस्ते तां कन्यां निक्षिप्य दायमुक्तौ भवितुं चेष्टेते। तादृशायाः कन्यायाः नास्ति काचित् वा स्वाधीनेच्छा सा आधुनिकयन्तर.सभ्यतायाः अंशरूपेणविराजते। किन्तु अस्माकं शास्त्रेषु उच्यते .

नार्यस्तु यत्र पूज्यन्ते रमन्ते तत्र देवताः।[3]

परन्तु आधुनिके युगे तादृशं चिन्तनं न अस्मासु विराजते एवंविधं सङ्कटं निराकर्तुं नारी.पुरुषयोः समानाधिकारः न केवलं विधौ किन्तु प्रायगिके क्षेत्रे प्रतिष्ठापयितव्य इति । प्राचीने भारतवर्षे नारीपुरुषौ एकस्य चनकस्य दलद्वयमिव स्तः इति चिन्तनमासीत् । एतदपि चिन्तनीयम् अस्माभिरपि यतः नारीपुरुषयोः समविकाशः समाजस्य पूर्णतां आनयति।

मनुष्यत्वविकाशरूपशिक्षायाः परिवर्तने सेवाकर्मसु नियोगमूलकाशिक्षा प्रवर्तिता। एवंविधशिक्षायां गुणसत्वेऽपि वहव एव दोषाः सञ्जाताः यतस्तैदोषै अस्तमिता गुणा एव । ईदृशी शिक्षा या वर्तमाने प्रचलिता सा मनुष्यत्वविकाशे अक्षमा एव प्रतिभाति। तेन इयं शिक्षा नेतिवाचकैव ।

अस्माकं शास्त्रेषु उच्यते **दृ** सा विद्या या विमुक्तये ।[4]

परन्तु ईदानीन्तनकाले विद्या पाशवद्ध हेतुर्भवति न तु विमुक्तये इति । एवंविध विद्यया मनुष्यः नितान्त एव दासरुपेण विपरिनमते । प्राचीनकाले विद्या अन्धकारं दुरीकृत्य आलोकवत् प्रतिभाति स्म । अतः आधुनिकेकालेऽपि प्राचीनभारतीयशिक्षापद्धतिमाधृत्य शिक्षाव्यवस्था प्रणयितव्या इति ।

तेन च वैदिकयुगवत् आधुनिकेऽपि मुने गुरुशिष्य सम्पर्कः मधुरो भविष्यति । प्राचीने युगे आचार्यः शिष्यं आत्मपुत्रवत् मन्यते स्म । एकदा तपोवने गुरुशिष्ययोः यः समसंवद्धः सम्पर्कः आसीत् स एव यथा इदानीं काले संपद्येत तथा चिन्तनीयश्चगुरुशिष्ययोः न केवलं वाह्यसम्बन्ध किन्तु आन्तरसौहार्दमूलकसम्बन्धः इदानीं कालेऽपि काङ्खितो विषयः। गुरुशिष्ययोः सम्बन्धः विषये कठोपनिषदि आदौ को मन्त्र उपलभ्यते येन गुरुशिष्ययोः आन्तरसम्बन्धः प्रत्येक्तं शक्यते । मन्त्रो यथा .

ओँ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवाव है।
तेजस्वि नावधीतमस्तु। मा विद्विषावहै।[5]

वर्तमानकाले तु छात्रशिक्षकः सम्पर्क विपरीतो जातः। शिक्षकैः चिन्तितव्यं यत् यैः छात्रैः सह तेषां व्यवहाराः प्रचलन्ति ते छात्राः न शिक्षकसमकक्षा एव । तेन हेतुना च स्वल्पकारणवशात् तेषु असहिष्णुता प्रदर्शनं विद्रूपकथनं कठोरशास्ति प्रदानं च अनायासेन सम्भवेयुः। प्रकृत्या दुर्वलान्तकरणत्वात् ते छात्रेभ्यः कठोरशास्तिं प्रदाय आत्मकर्तव्यं गोपयन्ति । राष्ट्रतन्त्रे वा शिक्षातन्त्रे वा कठोरशासननीतिः दुर्वलतायाः नामान्तरम्। रवीन्द्रपरिचयनामके ग्रन्थे अस्मिन् प्रसङ्गे एक मन्तव्यो दृश्यते। यथा – शक्तस्य भूषणं क्षमा । यत्र क्षमाविना तत्र शक्तिश्च क्षीणोति ।[6]

छात्रजीवनं तु समग्रसमाजजीवनस्य सूचनापर्व एव । तस्य सूचनापर्वणः मूलं लक्षं समग्रसमाजजीवनस्य उन्नतिसाधनम् । इमं लक्ष्यं प्राप्तये प्राचीने भारतवर्षे यः शिक्षादर्शः गृहीतः तत्र गभीरज्ञानेन सह व्यवहारिक जीवनस्य समुन्नत चिन्तया सह सरलजीवनयात्रायाः समन्वयः कृतः। किन्तु आधुनिक शिक्षापद्धतिः पाश्चात्य भावधारया प्रभावितो जातः। तत्र पाश्चात्यसभ्यता भोगमूलका एव । तत्र त्यागमाहात्म्यं भारतीयसंस्कृते मूले एव तिष्ठति । परकल्याणविधानचिन्तां विना न कश्चिदपि मनुष्यः मनुष्या भवति । अन्धानुकरणप्रचेष्टां परित्यज्य भोगवादात् च मुक्तो भूत्वा सर्वेषां कल्याणकामनायां प्रकृतं मनुष्यत्वं निहितमेव । प्राचीने भारतवर्षे यः शिक्षादर्शः समादृतो जातः सः शिक्षादर्शः अधुनातनकालेऽपि प्रयोक्तव्य इति ।

वैदिकसमाजे धनी निर्धनयश्च अवस्थानम् आसीत् । तत्सत्वेऽपि तस्मिन् समाजे नैतिकादर्शः उच्च आसीत् परन्तु अद्यतनकाले नीतिं विहाय दुर्नीतिरेव समाजस्य रन्ध्रे रन्ध्रे मस्तकान् उत्तोलयन्ति । भारतभूमौ संस्कृते स्थानं दुर्नीत्या अधिकृतम्। धर्मस्थाने च राजनीतिः संस्थापिता। वस्तुतस्तु समाजे इदानीन्तनकाले यः अवक्षयः दृश्यते स तु संस्कृतपरिहार परिणाम एव यतः नीतिशिक्षा चरित्रगठनशिक्षा सामाजिकं ज्ञानं अर्थनीति राजनीतिविषयकाशिक्षा संस्कृतभाषया निवन्धेषु शास्त्रग्रन्थेषु एव तिष्ठन्ति ॥ नैतिकं ज्ञानं विना परकल्याणविधानमाध्यमेन समाजं देशं वा उन्नमयितुं न शक्यते। यदि वर्तमाने समाजे सत्यसाम्ययोः पुनप्रतिष्ठा करणीया तदा देशकालभेदं वर्जयित्वा प्रत्येक मनुष्यस्य नैतिकता मानं उन्नतं कर्तव्यम्। शिक्षापाठक्रमे नीतिशिक्षायाः अभावात् अस्माकं एषा दुर्गतिः। संस्कृतं भाषा नीतिशिक्षया च परिपूर्णा। इदानीं संस्कृतं मृतं इति कल्पयित्वा तादृश चिन्तनस्य कुफलं सदा वयं अनुभवामिति। अथ नैतिकशक्त्या जातिं संघटयितुं समाजे च स्थिरत्वं विधातुं सर्वोपरि च सर्वेषु साम्यं प्रतिष्ठातुं संस्कृतभाषाशिक्षायां समधिकं गुरुत्वं प्रदातव्यमिति ।

अस्मिन् क्षुद्रे निवन्धे अस्माभिः यथाशक्ति समाजस्य अवक्षयः तस्य हेतुश्च संक्षेपेण आलोचितः। अवक्षयनिराकरणाय कथं सस्कृतमेव ग्राह्यं स हेतुकं तदपि विवृतमिति ।

### तथ्यसूची

1. सूर्यसूक्तम्. 10.85. 46.
2. अभिज्ञानशकुन्तलम्. 4.18.
3. मनुसंहिता. 3.56.
4. विष्णुपुराणम्. 1.19.41.
5. कठोपनिषद्. शान्तिपाठ.
6. रवीन्द्रपरिचयः आश्रमशिक्षा. पृ. 14.

### सन्दर्भ ग्रन्थसूची

1. वसु, योगीराज, वेदेर परिचयः, फार्मा के.एल.एम्. प्राइभेट लिमिटेड्, कलकाता, 2013.

2. वन्धोपाध्याय, शान्ति, वैदिक साहित्येर रूपरेखा, संस्कृत पुस्तक भाण्डार, कलकाता, 2003.
3. दत्त, रमेशचन्द्र, ऋग्वेद संहिता, हरफ प्रकाशनी, कलकाता, 1396 (वं).
4. चक्रवर्ती सत्यनारायण, अभिज्ञानशकुन्तलम्, संस्कृत पुस्तक भाण्डार, कलकाता, 2005.
5. राधाकृष्णण, सर्वपल्ली, पृथ्वीराज सेन, शिक्षककुलेर रवि, एस्.वि.एस. पाब्लिकेशन्, कलकाता, 2012.